## सङ्ख्या । (३८/३७६९)

[1]द्वन्द्वसमासे सङ्ख्यावाचि पूर्वपदं प्रकृतिस्वरं भवति । 'एकादश'[2] (तै.सं. ४.७.११.१) । द्वादश । त्रयोदश, त्रयोदश । 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' (उ. ३३०) इति निस्त्वादाद्युदात्त एकशब्दः । त्रेस्त्रयस् आदेशोऽन्तोदात्तो निपात्यते ॥

## आचार्योपसर्जनश्चान्तेवासी । (३६/३७७०)

आचार्योपसर्जनान्तेवासिनां यो द्वन्द्वः, तत्र पूर्वपदं प्रकृतिस्वरं भवति । आपिशलपाणिनीयाः । [3]पाणिनीयरौढीयाः । रौढीयकाशकृत्स्नाः । अपिशलस्यापत्यमापिशलिराचार्यः, '[4]अत इञ्' (४.१.९५/१०९५) । तेन प्रोक्तम् (४.३.१०१/१४८१) आपिशलम्, 'इञश्च' (४.२.११२/१३३३) इत्यण् । तदधीयते येऽन्तेवासिनः तेऽप्यापिशलाः, 'प्रोक्ताल्लुक्' (४. २. ६४/१२७४) इति तस्य [5]तद्धितस्याध्येतरि विहितस्य लुक् क्रियते । आपिशले[6]र्वा छात्राः आपिशलाः, इत्युभयथाप्याचार्योपसर्जनश्चान्तेवासी भवति । आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणार्थम्, सकलो द्वन्द्वः आचार्योपसर्जनो यथा विज्ञायेत । इह मा भूत्, पाणिनीयदेवदत्तौ ।

आचार्योपसर्जने इति किम् ? छान्दसवैयाकरणाः । अन्तेवासी इति किम् ? आपिशलपाणिनीये शास्त्रे ॥

## कार्तकौजपादयश्च । (३७/३७७१)

कार्तकौजपादयो [7]ये द्वन्द्वाः तेषु पूर्वपदं प्रकृतिस्वरं भवति । प्रकृतिस्वरपूर्वपदाः कार्तकौजपादयो भवन्ति । [8]विभक्त्यन्तानां पाठो वचन[9]विवक्षार्थः । चकारो द्वन्द्वाधिकारानुवृत्त्यर्थः । कार्तकौजपौ । कृतस्यापत्यं, कुजपस्यापत्यम् इत्यणन्तावेतौ । सावर्णिमाण्डूकेयौ । सावर्णिरिञन्तः । अवन्त्यश्मकाः । अवन्तेरपत्यानि बहूनि, तन्निवासो जनपदोऽवन्तयः । तथा अश्मकाः । पैलश्यापर्णेयाः । युवद्वन्द्वोऽयम् । पीलायाः अपत्यं पैलः, तस्यापत्यं युवा (४.१.९२/१०८८) इति 'अणो द्व्यचः' (४.१.१५६/११८०) इति विहितस्य फिञः 'पैलादिभ्यश्च' (२.४.५९/१०८४) इति लुक् । श्यापर्णशब्दो बिदादिः, तस्यापत्यं स्त्री श्यापर्णी, तदपत्यं युवा श्यापर्णेयः । बहुवचनमतन्त्रम्, तेन पैलश्यापर्णेयौ इत्यत्रापि भवति । कपिश्यापर्णेयाः । कपिरन्तोदात्तः, तस्यापत्यं बहुत्वे 'कपिबोधाङ्गिरसे' (४. १. १०७/१११९) इति [10]उत्पन्नस्य यञः 'यञञोश्च'

---

1. द्वन्द्वे क. 2. कुञ्चिकाः इत्यधिकम् ब. 3. उदाहरणमिदं नास्ति फ. 4. अत इञ् नास्ति फ. 5. तद्धितस्य नास्ति फ. 6. एव क. 7. ये नास्ति फ, कार्तकौञ्चपादयो क. 8. विभक्तिपाठो. 9. विवक्षायाम् क. 10. उत्पन्नस्य नास्ति ब.